**अलङ्घ्य** त्रि० न लङ्घ्यः । अनतिक्रमणीये । "त्रिलङ्घयिषतो लोकानलङ्घ्यानलघीयसः" माघः ।

**अलजी** स्त्री अला पर्य्याप्ता सती जायते जन—ड गौरा० ङीष् । सुश्रुतोक्ते सन्धिगतरोगभेदे यथा । "पूयालसः सोपनाहः स्रावाः पर्व्वणिकालजी । क्रिमिग्रन्थिश्च विज्ञेया रोगाः सन्धिगता नव" । तल्लक्षणं तत्रैव "जाता सन्धौ शुक्लकृष्णेऽलजी स्यात्तस्मिन्नेवास्यापिता पूर्व्वलिङ्गैः" इति।

**अलज्जा** स्त्री न लज्जा विरोधे न० त० । १धार्ष्ट्ये अभावे न०त०। २लज्जाभावे । न०ब० । ३लज्जाशून्ये त्रि०।

**अलञ्जर** पु०अलं सामर्थ्यं जृणाति जृ—अच् पृ० उत्। मणिके अलिञ्जरे बहुजलाधारे(जाला)मृण्मये पात्रे । [धनादौ ।

**अलञ्जीविक** त्रि० अलं जीविकायै ४त० । जीविकापर्य्याप्ते

**अलञ्जुष** त्रि० अलं जुष्यते कर्म्मणि बा०क । भक्षणपर्य्याप्ते मांसादौ । "अथ तच्छृतस्य परिस्यन्दति तदलञ्जुषम्" शत० ब्रा०"मांसं हि जोषाय भक्षणायालं पर्य्याप्तंभवति"भा०

**अलति** पु० अल—वा अतिच् । गीतिमातृकायाम् स्वरसाधनार्थे सारिगामादिस्वरभेदे तदुपक्रमेणैव हि गीतेः प्रारम्भात्तेषां गीतिमातृकात्वम् ।

**अलन्धन** त्रि०अलं प्रभूतं धनमस्त्यस्य अच्। पर्य्याप्तधने समृद्धे। "निरादिष्टधनश्चेत्तु प्रतिभूःस्यादलन्धनः" मनुः ।

**अलन्तराम्** अव्य० अलम्+अतिशये तरप् आमु । अत्यर्थ पर्य्याप्त्यादावर्थे। "पुरोडाशभुजामिष्टमिष्टं कर्त्तुमलन्तराम्" माघः। एवं तमप् आमु । अलन्तमाम् तत्रैवार्थे अव्य०।

**अलन्धूम** पु०अलमत्यर्थो धूमः। धूमसमूहे जटाध०। [श्रीधरः।

**अलब्ध** त्रि०न लब्धः। प्राप्तभिन्ने "अलब्धस्य प्राप्तरुपायोयोगः"

**अलभ्य** त्रि० न लभ्यः । अप्राप्ये । "रोगे चालभ्ययोगे च सीमन्ते पुंसवेऽपि च । यद्ददाति समुद्दिष्टं पूर्व्वत्रापि न दुष्यति" कालमा० मरी० "अलभ्ययोगे पुनरप्राप्यसम्बन्धनिमित्ते अशौचान्तदिवसे पूर्व्वत्र मलमासे" शु०त०रघु०।

**अलम्** अव्य० अल—बा० असु १भूषणे "जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम्" अस्य उपपदसंज्ञा अलङ्कृत्य "अलङ्कृत्य सुतादानं दैवं धर्म्मं प्रचक्षते" मनुः । २सामर्थ्ये शक्तौ "विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः" "कथा हि खलु पापानामलमश्रेयसे यतः" इति च माघः "वरेण शमितं लोकानलं दग्धुं हि तत्तपः" कुमा० ३पर्य्याप्तौ ४संपूर्णतायां ५प्राचुर्य्ये "प्रतिभूःस्यादलन्धनः" मनुः अलमस्त्यस्य धनम् अच् बहुधनइत्यर्थः कुल्लू० । ७वारणे, "अलं विवादेन यथा श्रुतं त्वया" कुमा० "अलं विवादेन शमोविधीयताम्"महाना० ८निषेधे "आलप्यालमिदं बभ्रोर्यत् स दारानपाहरत्" माघः ९निरर्थकत्वे १०अस्त्यर्थे ११अवधारणे १२अत्यर्थे च गणर०॥ "विजयायेत्यलमन्वशान्मुनिर्माम्" किरा० "अलं भूयः" मल्लि०। लस्य वा रः अरम्। तत्रार्थे अरङ्कृतशब्दे उदा० ।

**अलम्पशु** पु०अलं यज्ञे निरर्थः पशुः। "अप्रशस्ते पशौ "अलम्पशोरपशोश्च" कात्या० १९,१,४, पशुर्योग्यः सन् यो नाम पशून्नविन्दते सोऽलम्पशुरपशुः" कर्क० ।

**अलम्पुरुषीण** पु० अलं समर्थः पुरुषाय "अषडक्षेत्यादिना" पा० स्वार्थे ख । युद्धादिसमर्थे प्रतिमल्लादौ पुरुषे ।

**अलम्बुद्धि** स्त्री अलम् व्यर्था बाधितविषयत्वात् पर्य्याप्ता वा बुद्धिः । मिथ्याबुद्धौ, पर्य्याप्तबुद्धौ च । "पश्यन्नपि नालम्बुद्धिमवाप" किरा० १२,२९, श्लोक०व्या० मल्लि० ।

**अलम्बुष** पु० अलं पुष्णाति पुष—क पृ० पस्य बः । १वमने छर्द्दने । २प्रहस्ते रावणमन्त्रिराक्षसे ३घटोत्कचहते राक्षसभेदे च "अलम्बुषं तथा युद्धे विचरन्तमभीतवत् । हैडम्बिः प्रययौ तूर्णम्" इत्युपक्रम्य "रिपुं निहत्याभिननन्द वै तदा द्रुमलम्बुषं पक्कमलम्बुषं यथा" भा०द्रो०प० । अलम्बुषनामानौ च द्वौ राक्षसौ कुरुक्षेत्रयुद्धे समागतौ अयमेको घटोत्कचेन निहतः भी०प० अपरोपि निहतः इत्यविरोधः । ४अप्सरोभेदे तच्छब्दे विवृतिः । ५मुण्डीर्य्याम् मेदि० ६लज्जालुलतायाम् ७अन्याप्रवेशार्थं दत्तजलरेखायाञ्च स्त्री राज०। तस्याः फलम् अण् लुप् तत्फले न० । "द्रुमलम्बुषं पक्कमलम्बुषं यथा"भा०द्रो०प०।

**अलम्भूष्णु** त्रि०अलम्+सामर्थ्ये भू-ग्स्नु । "समर्थे "विनाप्यस्मदलम्भूष्णुरिज्यायै तपसः सुतः" माघः ।

**अलय** पु०न लयः विरोधे न०त०। १लयविरोधिनि उद्भवे । "शक्रादिष्वपि लोकेषु श्रूयमाणौ लयालयौ" रामा०अभावे न०त०। २विनाशाभावे। नास्ति लयोयस्याः ३अवस्थानशून्ये भ्रमणशीले "स्थानमानमति कालिमालया" माघः "लयो लयनं क्वचिदवस्थानं नास्ति यस्याः" मल्लि० ४विनाशशून्ये च त्रि०।

**अलम्बुसा** पु० ब०व० । देशभेदे ।

**अलर्क** पु० अलमर्कतेऽर्च्यते वा अर्क—अच् अर्च—घञ् वा शक०। १श्वेतार्कवृक्षे २क्षिप्तकुक्कुरे ३क्रिमिभेदे च स च भा०शा०प० दर्शितः यथा "अथ क्रिमिः श्लेष्ममेदोमांसशोणितभोजनः। दारुणो दारुणस्पर्शः कर्णंस्याभ्यासमागतः । स तस्योरु-